shrinath.udupa@gmail.com



श्रीगणेशायनमः ॥ देव्युवाच ॥ मेरुपृष्ठेसुखासीनं
भैरवंपरमेश्वरम् ॥ प्रसन्नवदनंदेवंनागयज्ञोपवीतिनम्
॥ १ ॥ गजचर्मपरीधानंभूतिभूषणविग्रहम् ॥ कपाल
मालाभरणंगंगावीचिरवा कुलम् ॥ २ ॥ चंद्रार्द्धांचित
मूर्द्धानंसर्पकंकणनूपुरम् ॥ खट्वांगशूलपाशासिवि
भूषितकरांबुजम् ॥ ॥ ३ ॥ वामांकस्थितगौरीशंदेव
गंधर्वसेवितम् ॥ यक्षेंद्रकिन्नरनुतंब्रह्माच्युतनमस्कृतम्
॥ ४ ॥ प्रहसंतं जपंतंच ध्यायंतंच मुहुर्मुहुः ॥
स्मितपूर्वंप्रणम्यादौबद्धांजलिपुटंततः ॥ ५ ॥ उत्था
यपार्वतीदेवीभगवंतमभाषत ॥ देव्युवाच भगवंस्त्वं

shrinath.udupa@gmail.com

परोदेवस्त्रैलोक्यप्रभुरीश्वरः ॥ ६ ॥ त्रिगुणात्मागुणा
१ तीतश्चित्स्वरूपोनिरंजनः ॥ सकलोनिष्कलोदेवः
सत्तारूपोमहेश्वरः ॥ ॥ ७ ॥ त्वंकिंजपसिदेवेशममा
प्यावेदितंतुयत ॥ तत्समाचक्ष्वसकलंयद्यहंतववल्ल
भा ॥ ८ ॥ भैरव उवाच ॥ एतद्गुह्यतमंलोकेनकस्य
कथितंमया ॥ तथापितवदेवेशिभक्त्यागुह्यंवदाम्य
हम् ॥९॥ यादेवीलोकमातेतिमहामाहेश्वरीशिवा ॥
प्रत्यंगिरेतिविख्याताषड्विंशतिसुवर्णिका ॥ १० ॥ १
सृजतेसकलंविश्वंबिभर्तिपरमांबिका ॥ अंतेसहायक
र्त्रीचसंहरिष्यतितामसी ॥ ११ ॥ गुणत्रयमयीविद्या

महादारिद्र्यवारिणी ॥ तस्याःपंचांगमीशानिपठाम्य
हमहर्निशम् ॥ १२ ॥ जपेविद्यांसर्वदैतांवर्मनामसह
स्रकम् ॥ स्तवंमंत्रमयंदेविपठामिपरमेश्वरीम् ॥१३॥
तत्प्रसादादहंदेवित्रैलोक्यप्रभुरीश्वरः ॥ भैरवोभैरवा
देशःसृष्टिस्थितिलयात्मकः ॥ १४ ॥ देव्युवाच ॥
भगवन्देवदेवेशनिःशेषकरुणाकर ॥ देव्याःप्रत्यंगि
रायाश्चपंचागंवक्तुमर्हसि ॥ १५ ॥ भैरवउवाच ॥ पट
लंपद्धतिंचैववर्मनामसहस्रकम् ॥ स्तोत्रंमंत्रमयंदेवि
वक्ष्येलोकहितेच्छया ॥१६॥ अत्रादौपटलंदिव्यंमूल
मंत्रमयंपरम् ॥ सयंत्र मंत्रसहितंप्रयोगसहितंशृणु

shrinath.udupa@gmail.com

 ॥१७॥अथमंत्रोद्धारः॥प्रणवंवाग्भवंमायालक्ष्मीःप्रत्यं
 गिरेतिच॥ममरक्षद्वयंदेविममशत्रून्पदंमयि॥१८॥ भ
क्षद्वयंप्रणवंचस्वाहांतोमंत्रउत्तमः ॥ एषाविद्यामया
ख्यातापरमानंददायिनी ॥ १९ ॥ भोगदासुखदादे
विराज्यदाधनदातथा ॥ सिद्धिमोक्षप्रदाविद्यापरासा
युज्यदायिनी ॥ २० ॥ गुरुपादप्रसादेनश्रीविद्यायदि
लभ्यते ॥ विनागुरूपदेशेननान्यत्सिद्ध्यतिपार्वति
॥ २१ ॥ नैःस्वांतरायोनक्लेशोनशोचनियमोपिवा॥
साक्षात्सिद्धिप्रदोदेविमंत्रोयंभोगमोक्षदः ॥ २२ ॥
वर्णलक्षंपुरश्चर्यातदर्द्धंवामहेश्वरि ॥ एकलक्षावधिकु

र्यान्नातोन्यूनंकदाचन ॥ २३ ॥ जपाद्दशांशतोहोम
स्तद्दशांशेनतर्पणम् ॥ मार्जनंतद्दशांशेनतद्दशांशेन
भोजनम् ॥ २४ ॥ वटेरण्येश्मशानेचशून्यागारेचतु
ष्पथे ॥ अर्धरात्रेचमध्याह्नेपुरश्चरणमारभेत् ॥ २५ ॥
जीवहीनोयथादेहःसर्वकर्मसुनक्षमः ॥ पुरश्चरण
हीनोयोनमंत्रःफलदायकः ॥२६॥ मंत्रमुत्कीलयेदा
दौमंत्रंसंजीवयेत्ततः ॥ निष्कौटिल्यंचरेत्पश्चात्ततः
शापहरं जपेत् ॥२७॥ सिद्धमंत्रंजपेच्छुद्धंततःसंपुटि
तंचरेत् ॥ क्रमेणानेनदेवेशि श्रीविद्यांयोजपेत्सुधीः
॥२८॥ससाधकोभवेल्लोकेभोगीसायुज्यमाप्नुयात् ॥

shrinath.udupa@gmail.com

मंत्रस्यास्यमुनिश्चैवमहाभैरवएवच ॥ २९ ॥ अनुष्टु
पछंदइत्युक्तः श्रीमत्प्रत्यंगिरेतिच ॥ देवतास्यापरा
बीजंशक्तिः स्वाहाचकीलकम् ॥ ३० भोगापवर्गसि
द्ध्यर्थंविनियोगइतिस्मृतः ॥ ध्यानमस्याः प्रवक्ष्या
मिसर्वतंत्रेषुगोपितम् ॥ ३१ ॥ आशांबरामुक्तकचा
घनच्छविर्ध्येयासचर्मासिकराहिभूषणा॥दंष्ट्रोग्रवक्त्रा
ग्रसिताहितात्वयाप्रत्यंगिराशंकरतेजसेरिता ॥ ३२ ॥
यंत्रोद्धारंप्रवक्ष्यामिसर्वसिद्धिप्रवर्तकम् ॥ सर्वसंमोह
नंचक्रंसर्वाशापरिपूरकम् ॥ ३३ ॥ बिंदुत्रिकोणं
वसुकोणयुक्तंवृत्ताष्टयंत्रंचत्रिवृत्तयुक्तम् ॥ भूगेह

लक्ष्मीखचितंचसिद्धिदंप्रात्यंगिरंचक्रमेतन्म योक्तम्
॥ ३४ ॥ लयांगमस्यवक्ष्यामियंत्रराजस्यपार्वति ॥
येनश्रवणमात्रेणकोटिपूजाफलंलभे ॥ ३५ ॥ इं
द्राद्यालोकपालाश्चब्रह्मानंतांकिताः प्रिये ॥ वज्रा
दिहेतिसंयुक्ताःपूज्याभूगेहमंडले ॥ ३६ ॥ वाय
व्येशानपर्यंतंदिव्यसिद्धौघमाप्नुयात् ॥ गुरूंश्चपू-
जयेद्देविपंक्तित्रितयमध्यगान् ॥३७॥ ब्राह्माद्यामात
रःपूज्याभैरवाष्टकसंयुताः ॥ वामावर्तक्रमेणैवरक्त
पुष्पैर्विशेषतः ॥३८॥ स्तंभिनी मोहिनीचैवक्षोभिणी
द्राविणीतथा ॥ जृंभिणी भ्रामिणीरौद्रीतथासंहारि

shrinath.udupa@gmail.com

१० णीतिच ॥ ३९ ॥ वसुकोणेपरापूज्यामहाचीनक्रमे
४ क्षुभिः ॥ वामावर्तेनदेवेशिपरमार्थप्रदासदा ॥ ४० ॥ स्तो०
कालीच भद्रकालीचनित्याकालीत्रिकोणगाः ॥
एताःसंपूजनीयास्तुशिवाग्नीवामभागतः ॥४१॥ देवीं
रत्नमयींपात्रेसौवर्णेपूजयेत्सुधीः ॥ लयांगमे तदा
ख्यातंसर्वसिद्धिप्रदंशिवे ॥४२॥ प्रयोगा नष्टवक्ष्येहं
शृणुष्वावहिताप्रिये ॥ स्तंभनंमोहनंचैवमारणाकर्ष
णेततः ॥ ४३ ॥ वशीकरोच्चाटनाख्येशांतिकंपौष्टि
कंततः ॥एतेषांसाधनंवक्ष्ये मंत्रसिद्धिप्रवर्त्तकम् ॥४४॥
येनश्रवणमात्रेण मंत्रःकल्पद्रुमोभवेत् ॥ रवौस्नात्वा ४

जपेन्मूलं वटमूलंमहेश्वरि ॥४५॥ अयुतंतद्दशांशेनहुने
दाज्यंसितांशटीम् ॥ गोधूममधुनालोड्यस्तंभयेद्वा
दिनांरसान् ॥ ४६ ॥ जलसूर्येंदुवातानांगतिरेषांचका
मिनाम् ॥अश्वत्थस्यतलेजप्त्वामूल विद्यांयथाविधि
॥४७॥ अयुतंतद्दशांशेनजुहुयात्सर्पिरेणजम् ॥ मांसं
कणाशटीमिश्रंमोहनंजगतांभवेत् ॥४८॥ कुजेवाश
निवारेवापित्र्यर्क्षेविष्टिसंगमे ॥ गत्वाश्मशानंदेवे
शिनत्वादिग्भूतभैरवान् ॥४९॥ चितांसंपूज्यवीरेशेज
पेदयुतसंख्यया ॥ चिताग्नौजुहुयादाज्यंगुरुपुष्येशता
वरीम् ॥५०॥ चंडालकेशनखरदंतमिश्रांचसाधकः ॥

M. V. Shankaran, M.Sc. B.Ed.

shrinath.udupa@gmail.com

तर्प्पयेत्तद्दशांशेनभोजयेत्पात्रपूर्वकम् ॥५१॥ शत्रुमृ
५ त्युःसामानोपिमृत्युमायातिनान्यथा ॥ करेरिमूले
गिरिजेजपेन्मूलंशिव युतम् ॥ ५२ ॥ हुनेदाज्यंव
चांशुंठींवानयातिवलासमम् ॥ मेनकापीनवक्षो
जास्वस्थाभ्याकर्षिताभवेत्॥५३॥वानीरमूलेदेवेशिज
पेदयुतसंख्यया ॥ हुनेदाज्यंह्यरद्धूतंनागवल्लीदलांकि
तम् ॥ ५४ भूबिम्बंतर्पयेद्देवींदशांशेनैवसाधक ॥
शक्रोपिदासतांयातिकिंपुनःक्षुद्रमानुषः ॥ ॥ ५५ ॥
क्रूरर्क्षेक्रूरवेलायांजपेत्प्रेतालयेमनुम् ॥ अयुतंतुचिता ५
वह्नौहुनेत्सर्पिःकणोषणाम् ॥ ५६ ॥ जातीफलंपलं

मेषंखररोमाणिपार्वति ॥ रिपूणां सहसादेविभवदुच्चा
टनंपरम् ॥ ५७ ॥ नदीकूलेजपेन्मंत्रमयुतंसाधको
त्तमः ॥ तद्दशांशंहुनेदाज्यंसमृद्वीकंसपायसम्
कनकंतगरंराज्ञीतर्पयेत्तद्दशांशतः ॥ अतिवृष्टेरना
वृष्टेर्मारीभीतेर्महेश्वरि ॥ ५९ ॥ राजभीतेर्महाव्या
घ्रात्सद्यःशांतिःप्रजायते ॥ महापर्वदिनेदेवियत्रतत्र
जपेन्मनुम् ॥ ६० ॥ अयुतंतद्दशांशेनजुहुयादाज्य
पायसम्॥ शैलंसिंदूरमिश्रंचसपलंसलवंगकम्॥६१॥
ऐणंमांसंशरंमीनंसालंचसकुलत्थकम् ॥ सासवंशुक
सद्वीतरजावेत्यंबरान्वितम् ॥ ६२ ॥ हुत्वाचतर्पयि

shrinath.udupa@gmail.com

त्वाचभोजयित्वाचसाधकान् ॥ पितॄणांदेवतानांच ऋषिणांकुलिनांप्रिये ॥ ६३ ॥ दिव्यकल्पायुतंदेविम हापुष्टिःप्रजायते ॥ सर्वथासर्वदानित्यंमहाविद्यांजपे त्सुधीः ॥ ६४ ॥ दशांशंहोमयेत्तत्रतर्प्पयेत्तद्दशां शतः ॥ भोजयेत्तद्दशांशेनमंत्रीकिंकिंनसाधयेत् ॥ ६५ ॥ मूर्खोवागीशतांयातिनिर्धनोधनवान्भवेत् ॥ महादारिद्र्ययुक्तोपिभवेद्वैश्रवणोपमः ॥ ६६ ॥ इह लोकेभवेद्भोगीपरत्रत्रिदिवंभजेत् ॥ इतीदंमंत्रसर्वस्वं प्रत्यंगिरारहस्यकम् ॥ ६७ ॥ पटलंगुह्यमीशानिगो पनीयंस्वयोनिवत् ॥ इतिश्रीरुद्रयामलेतंत्रेपंचांग

खंडेदशविद्यारहस्येप्रत्यंगिरापटलंसमाप्तम् ॥ ॥ ॐ ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणौ प्रक्षाल्य निजासने समुपविश्य निजशिरसि श्वेतवर्णसहस्र दलकमलकर्णिकांतर्गतचंद्रमंडलोपरि स्वगुरुं शुक्ल वर्णं शुक्लालंकारभूषितम् ज्ञानानंदमुदितमानसंस च्चिदानंदविग्रहम् चतुर्भुजं ज्ञानमुद्रापुस्तकवरदा भयकरं त्रिनयनं प्रसन्नवदनेक्षणम् ॥ सर्वदेवंवामां गेवामहस्तधृतकमलया रक्तवसनाभरणयास्वप्रिय या दक्षिणभुजेनालिंगितं परमशिवस्वरूपंध्यात्वा ॥ तच्चरणयुगलकमलविगलदमृतधारयास्वात्मानंप्लुतं

shrinath.udupa@gmail.com

विभाव्य ॥ मानसोपचारैराराध्य ॐऐंह्रींश्रींहसख्फ्रेंहसक्षमलवरयऊंसहखफ्रेंसहक्षमलवरयहुंसौं॥ सौः श्रीमच्छ्रीअमुकानंदनाथश्रीपादुकांपूजयामिनमः ॥ इतिदशधाविमृश्य॥ दंडप्रणामंमनसाकुर्यात् ॥ तत्र प्रणाममंत्रायथा ॥ नमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणम् ॥ शिरसायोगपीठस्थंमुक्तिकामार्थसिद्धये॥ श्रीगुरुंपरमानंदंवंदेआनंदविग्रहम् ॥ यस्यसान्निध्यमात्रेणचिदानंदायतेपरम् ॥ अज्ञानतिमिरांधस्यज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितंयेन तस्मैश्रीगुरवेनमः ॥ गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुःसाक्षान्महेश्वरः ॥ गुरुरेवजगत्सर्वंतस्मैश्रीगुरवेनमः ॥ इतिप्रणाममंत्रान्पठित्वाऽन्यांश्चपठेत् ॥ नमस्तेनाथभगवन्शिवाय गुरुरूपिणे ॥ विद्यावतारसंसिद्ध्यैस्वीकृतानेकविग्रहः ॥ नवायनवरूपायपरमार्थैकरूपिणे ॥ सर्वाज्ञानतमोभेदभानवेचिद्घनायते ॥ स्वतंत्रायदयाक्लृप्तविग्रहायपरात्मने ॥ परतंत्रायभक्तानांभव्यानांभव्यरूपिणे ॥ ज्ञानिनांज्ञानरूपायप्रकाशायप्रकाशिनाम् ॥ विवेकिनांविवेकायविमर्शायविमर्शिनाम् ॥ पुरस्तात्पार्श्वयोःपृष्ठेनमस्कुर्यादुपर्यधः ॥ सदामच्चित्त

shrinath.udupa@gmail.com

रूपेणविधेहिभवदासनम् ॥ इतिगुरुंप्रणम्य ॥ सुप्र
सन्नंविभाव्यमनसातदाज्ञांगृहीत्वा ॥ मूलाधारेस्वर्ण
चतुर्दलकमलकर्णिकांतर्गतत्रिकोणचक्रशृंगाटकोप
परिपरां शक्तिं कुंडलिनीमुद्यद्दिनकरसहस्रभास्वरां
विद्युत्कोटिसन्निभाम् ॥ सकलमंत्रमातरंसर्वप्राणि
जीवात्रिधमधामानम्॥सर्पाकारामूर्ध्वमुखींसार्धत्रिव
लयाम् ॥ बिसतंतुतनीयसींसुप्तांविभाव्य ॥ गुरूप
दिष्टनिजसहजनादेनबोधयित्वा ॥ तत्र ॥ वंन
मः ॥ शंनमः ॥ षंनमः संनमः ॥ इतिप
त्रेषुमध्येमूलेनचप्रादक्षिण्येनसंपूज्यहंसइतिमंत्रेणस

र्वंतःसंस्थाप्य ॥ ततोविद्रुमवर्णेषड्दलेस्वाधिष्ठाने
लिंगमूलेतांनीत्वा ॥ तत्र ॥ बंनमः ॥ भंन
मः॥ मंनमः ॥ यंनमः ॥ रंनमः ॥ लंनमः ॥ इ
तिपत्रेषुमध्येमूलेनचसंपूज्य ॥ ततोमणिपूरके
नाभौनीलवर्णेदशदलकमलेतांनीत्वा ॥ तत्र ॥
डंनमः ॥ ढंनमः ॥ णंनमः ॥ तंनमः थंनमः ॥
दंनमः ॥ धंनमः ॥ नंनमः ॥ पंनमः ॥ फंनमः
॥ इतिपत्रेषुमध्येमूलेनचप्रपूज्य ॥ ततोवक्षस्यना
हतेपिंगलवर्णेद्वादशदलकमलेतांनीत्वा ॥ तत्र ॥
कंनमः ॥ खंनमः ॥ गंनमः घंनमः ॥ ङंनमः ॥

M. V. Shankaran, M.Sc., B.Ed.

shrinath.udupa@gmail.com

प० चंनमः ॥ छंनमः जंनमः ॥ झंनमः ॥ ञंनमः ॥ स्तो०
१ टंनमः ॥ ठंनमः ॥ इतिपत्रेषुमध्येमूलेनचसंपूज्य ॥
तेजोविशुद्धौ ॥ कंठेधूम्रवर्णं षोडशदलकमलेतां
नीत्वा ॥ तत्र ॥ अंनमः आंनमः ॥ इंनमः ॥ ईंनमः
॥ उंनमः ॥ ऊंनमः ॥ ऋंनमः ॥ ॠंनमः ॥ ऌंनमः
॥ ॡंनमः ॥ एंनमः ॥ ऐंनमः ॥ ओंनमः औंनमः
॥ अंनमः अःनमः ॥ इतिपत्रेषुमध्येमूलेनसंपूज्य ॥
ततः सहस्रदलकमलकर्णिकांतर्गतबिंदुरूपतेजोमय
परमशिवेनसहैकतांनीत्वा ॥ तेनामृतेनततः १
स्रवतासंतर्प्यतत्रनादश्रवणतत्परोमुहूर्तंलयंविभाव्य-
॥ पुनरपितथैवाज्ञाचक्रादिक्रमेणतेषुतत्कमलेषुतैस्तै
रक्षरैःसंपूज्य ॥ अवरोहेमि मंत्रेणकमलात्कमलम
परोह्य ॥ पुनरपिमूलाधारे स्वस्थाने स्थापयेदित्या-
रोहावरोहक्रमेण परांदेवींकुंडलिनींध्यात्वा ॥ प्राणा
यामऋष्यादिकरषडंगन्यासध्यानानिवक्ष्यमाणक्र
मेणकृत्वा ॥ यथाशक्तिजपंविधाय ॥ पुनरपि ॥
प्राणायामादिनाजपसमर्प्य ॥ नित्यकृत्यंसमर्पये ॥
प्रातःप्रभृतिसायांतंसायादिप्रातरंतत ॥ यत्करोमि
जगद्योनेतदस्तुतवपूजनम् ॥ इतिसमर्प्यस्वकार्यानु
ष्ठानाय ॥ त्रैलोक्यचैत न्यमयेसुरेशिप्रत्यंगिरेत्वच्च

shrinath.udupa@gmail.com

प० रणाज्ञयैव ॥ प्रातः समुत्थायतवप्रियार्थंसंसारयात्राम स्तो०
१० नुवर्तयिष्ये ॥ संसारयात्रामनुवर्तमानंत्वदाज्ञयाश्री
परमेशिदेवि॥ स्पर्धातिरस्कारकलिप्रमादभयानिमां
माभिभवंतुमातः ॥ जानामिधर्मंनचमेप्रवृत्ति
र्जानाम्यधर्मंनचमेनिवृत्तिः ॥ त्वयाहृषीकेशहृ
दिस्थयाहंयथानियुक्तोस्मितथाचरामि ॥ इतिदेव्या
ज्ञांप्रार्थ्य ॥ अजपाजपंसहजसिद्धंतत्तद्देवताभ्यःसंक
ल्पसमर्पयेत् ॥ ओंअद्यपूर्वेद्युरहोरात्राचरितमुच्छ्
वासनिःश्वासात्मकंषट्शताधिकसेकविंशतिसहस्रसं १०
ख्याकमजपाजपमहंकरिष्ये ॥ इतिसंकल्प्यसमर्प्प
येत् ॥ ओंऐंह्रींश्रींमूलाधारचक्रस्थायगणपतये
अजपाजपानां षट्शतम् ६०० समर्प्पयामि
नमः ॥ ओंऐंह्रींश्रींस्वाधिष्ठानचस्थाय ब्रह्मणे अज
पाजपानां षट्सहस्राणि ६००० समर्प्पयामि नमः॥
ओंऐंह्रींश्रींमणिपूरचक्रस्थायविष्णवेअजपाजपानां
षट्सहस्राणि ६००० समर्पयामिनमः ॥ ॐऐंह्रीं
श्रींअनाहतचक्रस्थायरुद्रायअजपाजपानांषट्सहस्रा
णि ६००० समर्प्पयामिनमः ॥ ॐऐंह्रींश्रींविशुद्ध
चक्रस्थायजीवात्मनेअजपाजपानांसहस्रं१०००सम
र्प्पयामिनमः ॥ ॐ ऐंह्रींश्रींआज्ञाचक्रस्थायपरमा

shrinath.udupa@gmail.com

१० त्मनेअजपाजपानां सहस्रम् १००० समर्प्पयामिन
११ मः ॥ ॐ ऐं-ह्रींश्रींसहस्रदलकमलकर्णिकामध्यस्था स्तो०
यैश्रीगुरुपादुकायै अजपाजपानांसहस्रंसमर्प्पयामि
नमः ॥ इत्यजपाजपंसमर्प्य ॥ अजपामन्त्रेणप्राणा
यामंकृत्वा ॥ हंसात्मनेऋषयेनमः शिरसि ॥ अव्य
क्तगायत्रीछंदसेनमः मुखे ॥ परमहंसायदेवतायै
नमःहृदये ॥ ॐ ऐंह्रींश्रीं सःशक्तयेनमः पादयोः ॥
ॐऐंह्रींश्रींसोहंकीलकायनमःनाभौ ॥ ॐऐंह्रींश्रींओं
कारतत्त्वायनमःहृदये ॥ ॐऐंह्रींश्रींउदात्तस्वराय ११
नमःकंठे ॥ ॐऐंह्रींश्रींनभसेस्थानायनमःमूर्ध्नि ॥ ॐ
ऐंह्रींश्रींहंसायवर्णायनमः सर्वांगे ॥ इतिविन्यस्य ॥
ममसोक्षार्थंजपेविनियोगः ॥ इतिकृतांजलिर्वदेत ॥
ततः।ॐऐंह्रींश्रींह्रसांसूर्यात्मनेस्वाहाअंगुष्ठाभ्यांनमः॥
ॐऐंह्रींश्रींह्रसींसोमात्मनेस्वाहातर्ज्जनीभ्यां नमः ॥
ॐ ऐंह्रींश्रींह्रसूंनिरंजनात्मनेस्वाहामध्यमाभ्यां ॥ ॐ
ऐंह्रींश्रींह्रसैंनिराभासात्मने स्वाहाअनामिकाभ्यांन
मः॥ॐऐं-ह्रींश्रींह्रसौंकनिष्ठतनुःसूक्ष्मादेवीप्रचोदया
त्स्वाहा ॥ कनिष्ठिकाभ्यांनमः॥ ॐऐं-ह्रींश्रींह्रसः ॥
अव्यक्तबोधात्मनेस्वाहाकरतलकरपृष्ठाभ्यांनमः ॥
इतिकरन्यासः ॥ अथषडंगन्यासः ॥ ॐऐं-ह्रींश्रीं

shrinath.udupa@gmail.com

पृ० हृसांसूर्यात्मनेस्वाहाहृदयायनमः ॥ ॐऐंह्रींश्रींहृसीं स्वो०
१२ सोमात्मनेस्वाहाशिरसेस्वाहा ॥ ॐऐंह्रींश्रींहृूंनिरं
जनात्मनेस्वाहाशिखायैवषट् ॥ ॐऐंह्रींश्रींहृसैंनि
राभासात्मनेस्वाहाकवचायहुं ॥ ॐऐंह्रींश्री
हृसैंकनिष्ठतनुः सूक्ष्मादेवीप्रचोदयात्स्वाहानेत्रत्रयाय
वौषट् ॥ ॐऐंह्रींश्रींहृसः ॥ अव्यक्तबोधात्मनेस्वा
हाअस्त्रायफट् ॥ इतिकरयोर्विन्यस्य ॥ हृद्यप्येतानेव
मंत्रान्विन्यस्यध्यानंकुर्यात् ॥ धांमूर्धानं यस्यविप्रा
वदंतिखंवैनाभिंचंद्रसूर्यौचनेत्रे ॥ दिग्भिःश्रोत्रेयस्य १२
पादौक्षितिश्चध्यातव्योसौसर्वभूतांतरात्मा ॥ इतिवि
राट्स्वरूपं स्वात्मानंध्यात्वा ॥ तदनुसंधायिप्राणवा
योर्निर्गमप्रवेशात्मकमजयामंत्रं ॥ हंसः ॥ पंचविंश
तिवारंजप्त्वासमर्प्य ॥ गुरूपदिष्टमार्गेणनादानुसंधा
नपूर्वकंनिरस्तसमस्तोपाधिना ॥ केनापिचिद्विलासे
नप्रवर्तमानोस्मीतिविभाव्यस्वकार्यानुष्ठानाय ॥ स
मुद्रमेखलेदेविपर्वतस्तनमंडले ॥ विष्णुपत्निनमस्तु
भ्यंपादस्पर्शंक्षमस्वमे ॥ इतिभूमिंप्रार्थ्यश्वासानुसारे
णतस्यांपादंनिधाय ॥ नद्यादौगत्वावैदिकंस्नानंनि
र्वर्त्य ॥ तांत्रिकमारभेत् ॥ तत्रादौ ॥मूलमात्मतत्त्वा
यस्वाहा ॥ मूलविद्यातत्त्वायस्वाहा ॥ मूलशिवत

shrinath.udupa@gmail.com

१० त्वायस्वाहा॥ अथ वा॥ ॐ ह्रींस्वाहा॥ इत्याचम्य ॥ स्तो०
१३ मूलंस्मरन् ॥ मलापकर्षणस्नानंविधायपुराचम्य॥ ॐ
अद्यामुकमासस्यामुकपक्षस्यतिथावमुकायाम्॥ अमु
कक्षेत्रेअमुकशर्माहंश्रीकुलदेवताप्रीतयेतांत्रिकविधि
नास्नानमहंकरिष्येइतिसंकल्पंकृत्वा ॥ जलेत्रिकोण
चक्रंविलिख्य॥ सूर्यमंडलात्।गंगेचयमुनेचैवगोदाव
रिसरस्वति ॥ नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकु
रु॥इतिअंकुशमुद्रयातीर्थमावाह्य॥पुरःकल्पिततीर्थेसं
योज्य ॥ आचम्य ॥ स्वात्मानंपोक्ष्यमूलेनमृत्तिक १४
यास्नपनंविधाय ॥ मूलंपठन् ॥ कुंभमुद्रयाहितांस्व
देवतांत्रिभिरभिषिच्य ॥ श्रवणादिसप्तच्छिद्राना
रुध्य ॥ त्रिर्निमज्ज्योन्मज्जेत् ॥ इतिस्नानविधिः ॥
अथसंध्या ॥ पूर्ववदाचम्य ॥ स्वमूलप्राणायामः ॥
ऋष्यादिकरषडंगंविधाय ॥ पूर्ववत्तीर्थमावाह्य ॥
वामहस्तेतज्जलंनिधाय ॥ दक्षहस्तेनाच्छाद्य ॥ लंवं
रंयंहं ॥ इतित्रिरभिमंत्र्यमूलमुच्चरंस्तत्त्वमुद्रया मूर्ध्नि
सप्तधामूलेनचत्रिधाभ्युक्ष्य ॥ शेषजलंदक्षहस्तेसमा
धायतेजोरूपंध्यात्वा इडयादेहांतःपापंप्रक्षाल्य ॥
कृष्णवर्णंतज्जलंपापरूपंपिंगलयाविरिच्य ॥ पुरः
कल्पितवज्रशिलायांफडितिनिक्षिपेत् ॥ ततोऽर्घ्यं

shrinath.udupa@gmail.com

कृ० विधाय ॥ ओंह्रांह्रींहंसः श्रीमार्तंडभैरवायप्रकाश स्तो०
१४ शक्तिसहिताय इदमर्घ्यं परिकल्पयामिस्वाहा इति
त्रिरर्घ्यंकुलसूर्य्यायदत्वा ॥ हृत्पद्मात्सूर्यमंडलेमूल
देवींनीत्वा तत्र विधिवद्ध्यात्वा ॥ ॐ प्रत्यंगिरायै
विद्महेशत्रुनिषूदिन्यैधीमहितन्नोदेवीप्रचोदयात् ॥
इति मूलगायत्री ॥ अनया चतसृषु संध्यासुसूर्य
मंडलेमूलदेव्यैअर्घ्यंदत्त्वा ॥ यथाशक्तिजपेत् ॥ चत
सृषुसंध्यासुक्रमशोमूलाधारहृत्कमलभ्रूमध्यब्रह्मरंध्रे
भ्योदेवीतेजःसमाकृष्य ॥ इडयाविरेच्यकल्पितवह्नि १४
सूर्यचंद्रतारामंडलेषुनिक्षिप्य ॥ ततःदेवींध्यात्वा ॥
स्वस्वगायत्र्यार्घ्यंदत्वा ॥ यथाशक्तिस्वस्वगायत्रीं
जप्त्वा ॥ पुनर्मूलगायत्रींचजप्त्वा ॥ स्वस्वबीजाक्षरं
सर्वंमूलंचजप्त्वा ॥ प्राणायामादिनाजपंसमर्प्यमंड
लेभ्योदेवीतेजः ॥ ॥ स्वस्वस्थानेदेवींच हृदि आनी
यध्यायेदितिसंध्याविधि ॥ ततस्तर्पणम् ॥ पूर्ववदाच
म्यप्राणायामादिकृत्वा ॥ तीर्थमावाह्य ॥ मूलेनजलं
सप्तधाऽमृतमुद्रयाऽमृतीकृत्य ॥ तत्रजलेयंत्रंध्यात्वा ॥
तत्रदेवींहृदयात्सपरिवारामानीयषडंगयोगेनसकली
कृत्य ॥ कुंडलिन्याःप्रयोगेनामृतेनाभिषिच्य ॥ विधिव
त्प्रपूज्य ॥ ऐशान्याम् ॥ ऐंश्रींश्रीअमुकानंदनाथभैरव

shrinath.udupa@gmail.com

प्र० स्तृप्यतामिति त्रिः संतर्प्य ॥ वह्नौपरमगुरुश्री स्तो॰
१५ पादुकां तर्पयामि ॥ नैर्ऋत्यांपरमाचार्यगुरु
श्रीपादुकांतर्प्पयामि ॥ वायव्ये ॥ परमेष्ठिगुरुश्री
पादुकांतर्प्पयामि इतित्रिःसकृद्वासंतर्प्य ॥ दिव्य
सिद्धमानवौघानपिगुरून्संतर्प्यजलेयंत्र विभा
व्य ॥ मूलभैरवसहितेप्रत्यंगिरितृप्यतामिति
त्रिःसंतर्प्य ॥ परिवारानपिसंतर्प्य ॥ प्राणाया
मादिविधाय ॥ देवींस्वहृदिविसृजेदिति ॥ ती
र्थंचविसृजेत्स्वस्थानेइतितर्प्पणम् ॥ ततोगृहमा १५
गत्य ॥ जलादिनाद्वारदेवताः पूजयेत् ॥ ॐ
धात्र्यैनमः ॥ विविधात्र्यैनमःदक्षे ॥ गंगंगं
यैनमः ॥ यंयमुनायैनमःवामे ॥ द्वारश्रियैनमः
देहल्यैनमःऊर्ध्वे ॥ वास्तुपुरुषायनमः ॥ ॥ अधः
॥ इतिसंपूज्य ॥ वीरासनेनोपविश्य ॥ पृ
थ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वं
चधारयमांदेविपवित्रंकुरुचासनम् ॥ इतिपृथ्वीं
प्रार्थ्य ॥ संविदंयथामंत्रंस्वाकुर्यात् ॥ तद्विधि
र्यथा ॥ संविद्ब्रह्मसंभूतेब्रह्मपुत्रिसदानघे ॥ ब्रा
ह्मणानांचतृप्त्यर्थंपवित्राभवसर्वदा ॥ ॐब्राह्म
ण्यैनमःस्वाहा ॥ सिद्धिमूलक्षयेदेविहीनबोधप्र

M. D. Shankaran, M.Sc., B.T.

shrinath.udupa@gmail.com

प्र० बोधिनि ॥ राजाप्रजावशंकरिशत्रुपक्षनिषूदिनि स्तो.
१६ ॥ ऐंक्षत्रियायैनमःस्वाहा ॥ अज्ञानेंधनदीप्ता
ग्नौज्ञानाग्निब्रह्मरूपिणी ॥ आनंदस्याहुतिप्रीति
सम्यग्ज्ञानंप्रयच्छमे ॥ ह्रींवैश्यायैनमःस्वाहा ॥
नमस्यामिनमस्यामियोगमार्गप्रदर्शिनि ॥ त्रैलो
क्यविजयेमातःसमाधिफलदाभव ॥ क्लींशूद्रा
येनमःस्वाहा ॥ इतिअभिमंत्र्य ॐअमृतेअमृ
तोद्भवे अमृतवर्षिणि अमृतमाकर्षयाकर्षयसि
द्धिंदेहिदेहि ॥ अमुकपदंमेवशमानयस्वाहेतितदुपरि १६
सप्तधामूलंचजप्त्वा ॥ धेनुमुद्रयामृतीकृत्यावाहना
दिमुद्राःसंदर्श्य ॥ छोटिकाभिर्दिग्बंधंविधाय ॥ एंव
दवदवाग्वादिनीममजिह्वाग्रेस्थिरीभव ॥ सर्वसत्त्व
वशंकरीस्वाहा ॥ इत्यनेनमुखेजुहुयात् ॥ ततआनं
दमयोभूत्वाअपसर्पंतुतेभूतायेभूताभुविसंस्थिताः ॥
येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया ॥ पाखंड
कारिणोभूत्वाभूताभूम्यंतरिक्षगाः॥दिविलोकेस्थिता
येचतेनश्यंतुशिवाज्ञया ॥ इतितर्ज्जनीमध्यमाभ्यामू
र्ध्वोर्ध्वतालत्रयदानेन ॥ वामपार्ष्णिघातत्रयेण दिव्य
दृष्ट्या च त्रिविधान्विघ्नानुत्सार्य्य ॥ छोटिकाभिर्द
शदिग्बंधंकृत्वा ॥ चतुर्दिक्षु वह्निप्राकारंसंचिंत्यप्राणा

१० यामंकुर्यात् ॥ तत्रप्रणवंषोडशवारमुच्चरन् ॥ दक्षांगु स्तो०
१७ ष्ठेनदक्षनासापुटंनिरुद्ध्यवामेनपवनंपूरयेत् ॥ ततस्त
मेवचतुष्षष्टिवारमुच्चरन् ॥ दक्षानामाकनिष्ठाभ्यांवा
मंपुटंचनिरुध्य ॥ द्वाभ्यांपवनंकुंभयेत् ॥ ततस्तमेव
द्वात्रिंशद्वारमुच्चरन् वामंपुटंतथैवनिरुध्य ॥ दक्षेनपव
नंरेचयेदित्येकः प्राणायामः ॥ एषएवविपर्ययेणद्वि
तीयः ॥ प्रथमवत्तृतीयः ॥ इत्थंप्राणायामेननिरस्तस
कलकलुषंस्वदेहंदेवताराधनयोग्यंविभाव्य भूतशुद्धिं १७
कुर्यात् ॥ अथमूलाधारेहंसइतिमंत्रेणकुंडलिनींपृथ्वी
सहस्राधिष्ठानेआनीय ॥ तत्रजलेपृथ्वींविलीनांविभा
व्य ॥ तस्माज्जलेनसहमणिपूरेसमानीयतत्रवह्नौजलं
लीनंविचिंत्य ॥ तस्माद्वह्निनासहानाहतेसमानीय ॥
तत्रवायौवह्निंलीनंविचिंत्य ॥ तस्माद्वायुनासहविशु
द्धेसमानीय ॥तत्रस्थाकाशेवायुंलीनंविचिंत्य तस्मा
दाकाशेनसहआज्ञाचक्रेसमानीय ॥ तत्रस्थमनस्या
काशंलीनंसंचिंत्यमनोनादेलीनंविभाव्य ॥ ध्वनौ
ध्वनिंसमर्प्य ॥ सहस्रदलकमलकर्णिकांतस्थचंद्रमं
डलमध्यगतेत्रिकोणांतर्गततेजोमयबिंदुरूपपरमशि
वेतंसमर्प्य ॥ प्राणायामविधिना यामिति वायुबीजं १०
धूम्रवर्णं षोडशधा जपन् शरीरेववामकुक्षिस्थितंपाप

shrinath.udupa@gmail.com

प्र० पुरुषं कज्जलप्रभम्ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुज स्तो०
१८ द्वयम्॥सुरापानहृदायुक्तंगुरुतल्पकटिद्वयम्।तत्संसर्ग
पदद्वंद्वमंगप्रत्यंगपातकम् ॥उपपातकरोमाणंरक्तश्म
श्रुविलोचनम्॥खड्गचर्मधरंक्रुद्धंपुण्यंपापंविचिंत्यता
म्॥ संशोष्ययमितिवह्निबीजंरक्तवर्णंचतुष्षष्टिवारंजपं
स्तमेवसंदह्यवमितिसुधाबीजंशुक्लवर्णंसहस्रारेविचिंत्य
द्वात्रिंशद्वारंजपंस्तद्भवामृतवृष्ट्यानिष्पापं शरीरमुत्पा
द्य ॥ ललाटस्थलमितिपृथ्वीबीजेनपीतवर्णेनषोडश
धाजप्तेन सुदृढीकृत्य ह्रीमिति षोडशधाजप्तेन मूल १८
स्थेन साकाशक्तिबीजेनऐश्वर्यंदेहंविधाय ॥ सोहमि
तिमंत्रेणकुंडलिनीममृतलोलीभूतां पंचभूतानि जी
वात्मानंचब्रह्मपथेनस्वस्वस्थाने नियोजयेत्॥ ततोदे
वीरूपमात्मानंविचिंत्य ॥ हृदिदक्षहस्तंनिधाय ॥
प्राणप्रतिष्ठांकुर्यात् ॥ ॐ आं ह्रींक्रौंयंरंलंवंशंषंसं
हंक्षंह्सौंःहंसःश्रीप्रत्यत्यंगिरायाःप्राणाइहप्राणाः॥ ॐ
आंह्रींक्रोंयंरंलंवंशंषंसंहंलंक्षंह्सौंः श्रीप्रत्यंगिरायाः
जीवइहस्थितः॥ॐ आंह्रींक्रोंयंरंलंवंशंषंसंलंक्षंह्सौं
हंसः सर्वेन्द्रियाणिइहस्थितानि ॐ आंह्रींक्रोंयंरंलंवं
शंषंसंहंलंक्षंह्सौंहंसः॥वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्रा
णप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ इतिप्राणप्रति

shrinath.udupa@gmail.com

१०. ष्ठांविधाय ॥ स्वमूलेनऋष्यादिस्मरणंविदधीत तद्य
१०. था ॥ अस्यश्रीप्रत्यंगिरामहामंत्रस्यभैरवऋषिः ॥
अनुष्टुप्छंदः ॥ श्रीप्रत्यंगिरादेवता ॥ ऱ्हींबीजं ॥
श्रींशक्तिःस्वाहाकीलकंविद्यासिद्ध्यर्थेजपेविनियोगः
इतिकृतांजलिःस्मृत्वा ॥ यथाविधिन्यसेत् ॥ भैरव
ऋषयेनमः ॥ शिरसि ॥ अनुष्टुप्छंदसेनमः मुखे॥
श्रीप्रत्यंगिरादेवतायैनमः हृदि॥ऱ्हींबीजायनमःगुह्ये
श्रींशक्तयेनमःपादयोः॥स्वाहाकीलकायनमःनाभौ ॥
ममश्रीधर्मार्थकाममोक्षार्थेजपेविनियोगःसर्वांगे।इति
ऋष्यादिस्मरणम्।ऐंनमःनाभ्यादिपादांतं ह्रींनमःकं
ठादिनाभ्यंतम् ॥ श्रींनमःमूर्धादिकंठांतम् ॥ ऐंनमः
वामपाणितले ॥ ऱ्हींनमः दक्षपाणितले ॥ श्रांनमः
उभयोः ॥ अथस्वमूलकरन्यासः ॥ ॐ ऐंअंगुष्ठा
भ्यांनमः ॥ ॐ ह्रींतर्जनीभ्यांनमः ॥ ॐ श्रींमध्य
माभ्यांनमः ॥ प्रत्यंगिरेअनामिकाभ्यांनमः ॥ ममर
क्षरक्षकनिष्ठिकाभ्यांनमः॥ममशत्रूणांभक्षभक्षॐस्वा
हाकरतलकरपृष्ठाभ्यांनमः॥इतिकरन्यास॥अथ षडं
गन्यासः ॥ ॐ ऐंहृदयायनमः ॥ ऱ्हींशिरसेस्वाहा॥
श्रींशिखायैवषट् ॥ प्रत्यंगिरेकवचायहुम् ॥ म
मरक्षरक्षनेत्रत्रयायवौषट् ॥ ममशत्रूणांभक्षभक्ष

shrinath.udupa@gmail.com

ॐस्वाहाअस्त्रायफट्इतिषडंगन्यासः ॥ अथमा
तृकान्यासः ॥ ॐअस्यश्रीअंतर्मातृकान्यास
स्य ब्रह्माऋषिः गायत्रंछंदःश्रीमातृकासरस्व
तीदेवता ॥ हलोवीजानि ॥ स्वराःशक्तयः ॥
अव्यक्तं कीलकं मम श्रीप्रत्यंगिरात्वेनन्या
सेविनियोगः ॥ इतिप्रांजलिःस्मृत्वान्यसेत् ॥
ब्रह्मऋषयेनमः शिरसि ॥ गायत्रीछंदसेनमः मु
खे ॥ श्रीअंतर्मातकादेवतायैनमः हृदये ॥ ह
लोबीजेभ्योनमः गुह्ये ॥ स्वराःशक्तिभ्योनमःपाद
योः ॥ अव्यक्तंकीलकायनमः नाभौ ॥ मम श्रीप्र
त्यंगिरात्वेनन्यासेविनियोगः इतिसर्वांगे ॥ अथ
मातृकाकरन्यासः ॥ ॐऐंह्रीं श्रीं अंकंखंगंघंङं
आंअंगुष्ठाभ्यांनमः ॥ ॐ ऐंह्रीं श्रींइंचंछंजं झंईंतर्ज्ज
नीभ्यांनमः ॥ ॐऐंह्रीं श्रीं उंटंठंडंढंणंऊंमध्यमा
भ्यांनमः ॥ ॐऐंह्रीं श्रींएंतंथंदंधंनंऐं अनामिकाभ्यां
नमः ॥ ॐऐंह्रीं श्रींओंपंफंबंभंमंऔं कनिष्ठिकाभ्यां
नमः ॥ ॐऐंह्रीं श्रींअंयंरंलंवंशंषंसंहंलंक्षं अः कर
तलकरपृष्ठाभ्यांनमः ॥ इतिकरन्यासः ॥ अथषडं
गन्यासः॥ ॐऐंह्रीश्रींअंकंखंगंघंङंआंहृदयायनमः
॥ ॐ ऐंह्रीं श्रींइंचंछंजंझंञंईंशिरसेस्वाहा ॥ ॐऐंह्रीं

shrinath.udupa@gmail.com

१० श्रींउंटंऊंडंढंणंऊंशिखायैवषट् ॥ ॐऐंह्रींश्रींएंतंथंदं
धंनंऐंकवचायहुं ॥ ॐऐंह्रींश्रीओंपंफंबंभंमंऔं नेत्रत्र
२१ यायवौषट्ॐऐंह्रींश्रींअंयंरंलंवंशंषंसंहंक्षंअः अस्त्रा
यफट्इतिकरयोः रंअगुष्ठादितलांतं विन्यस्य ॥
हृदयादिषडंगेष्वपिन्यसेत् ॥ ततोंतर्मातृकान्यासः ॥
अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः
ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः
ओंनमः औंनमः अंनमः अःनमः इति कंठेषोड २१
शदले ॥ कंनमः खंनमः गंनमः घंनमः ङंनमः
चंनमः छंनम जंनमः झंनमः ञंनमः टंनमःठंनमः
इत्यनाहतेद्वादशदले ॥ डंनमः ढंनमः णंनमः तंनमः
थंनमः दंनमः धंनमः नंनमः पंनमः फंनमः
मः इति नाभौदशदले ॥ बंनमः भंनमः मंनमः
यंनमः रंनमः लंनमः इति लिंगमूलेषड्दले ॥ वं
नमः शंनमः षंनमः संनमः इति मूलाधारे चतुर्द
ले ॥ हंनमः क्षंनमः इति भ्रूमध्येद्विदले ॥ इत्यंत
र्मातृकावदेव ॥ न्यासस्तु ॐऐंह्रींश्रींअंनमः शिर
सि ॥ॐऐंह्रींश्रींआंनमः मुखवृत्ते ॥ ॐऐंह्रींइंनमः
दक्षनेत्रे ॥ ॐऐंह्रींश्रींईंनमः वामनेत्रे ॥ ॐऐंह्रीं
उंनमः दक्षकर्णे ॥ ॐऐंह्रींश्रींऊंनमः वामकर्णे ॥

shrinath.udupa@gmail.com

२० ॐऐं-ह्रींश्रींॠंनमः ॥ दक्षनासे ॐऐंह्रींश्रींॠंनमः स्तो०
२२ वामनासे ॥ ॐऐंह्रींश्रींऌंनमः दक्षगंडे ॥ ॐऐंह्रीं
श्रींएंनमः ऊर्ध्वोष्ठे ॥ ॐऐंह्रींश्रींऐंनमः अधरोष्ठे ॥
ॐऐंह्रींश्रीः ओंनमः ऊर्ध्वदंतपंक्तौ ॥ ॐऐंह्रींश्रींऔं
नमः अधोदंतपंक्तौ ॥ ॐऐंह्रींश्रींअंनमः मूर्ध्नि ॥
ॐऐंह्रींश्रींअः नमः अस्थ्नि ॥ ॐऐंह्रींश्रींकंनमःद
क्षबाहुमूले ॥ ॐऐंह्रींश्रींखंनमः कूर्प्परे ॥ ॐऐंह्रीं
श्रींगंनमः मणिबंधे ॥ ॐ ऐंह्रींश्रींघंनमः दक्षहस्तां
गुलिमूले ॐ ऐंह्रींश्रींङंनमः दक्षहस्तांगुल्यग्रे ॥ ॐ २१
ऐंह्रींश्रींचंनमः वामबाहुमूले ॐ ऐंह्रींश्रींछंनमःकू
र्प्परे ॐ ऐंह्रींश्रींजंनमः मणिबंधे ॐ ऐंह्रींश्रींझंनमः
वामहस्तांगुलिमूले ॐ ऐंह्रींश्रींञंनमः वामहस्तांगु
ल्यग्रे ॐ ऐंह्रींश्रींटंनमः दक्षपादमूले ॐ ऐंह्रींश्रीं
ठंनमः जानुनि ॐ ऐंह्रींश्रींडंनमः गुल्फे ऐंह्रींश्रीं
ढंनमः दक्षपादांगुलिमूले ॐ ऐंह्रींश्रींणंनमः दक्षपा
दांगुल्यग्रे ॐ ऐंह्रींश्रींतंनमः वामपादमूले ॐ ऐंह्रीं
श्रींथंनमः जानुनि ॥ ॐ ऐंह्रींश्रींदंनमः गुल्फे ॐ
ऐंह्रींश्रींधंनमः वामदांगुलिमूले ॥ ॐऐंह्रींश्रींनंनमः
वामपादांगुल्यग्रे ॥ ॐ ऐंह्रींश्रींपंनमः दक्षपार्श्वे ॐ

shrinath.udupa@gmail.com

१० ऐंह्रींश्रींफंनमः वामपार्श्वे ॐ ऐंह्रींश्रींबंनमः पृष्ठे ॐ श्लो०
२३ ऐंह्रींश्रींभंनमः नाभौ ॥ ॐ ऐंह्रींश्रींमंनमः उदरे
ॐ ऐंह्रींश्रींयंत्वगात्मनेनमः वामांसे ॥ ॐ ऐंह्रीं
श्रींरंअसृगात्मनेनमः ॥ दक्षांसे ॥ ॐ ऐंह्रींश्रीं
लंमांसात्मनेनमः ककुदि ॥ ॐ ऐंह्रींश्रींवंमेदआ
त्मनेनमः हृदादिदक्षकरांतम् ॥ ॐऐंह्रींश्रींशंअ
स्थ्यात्मनेनमः हृदादिदक्षकरांतम् ॥ ॐऐंह्रींश्रींषं
मज्ञात्मनेनमः हृदादिवामकरांतम् ॥ ॐ ऐंह्रीं श्रीं
संशुक्लात्मनेनमः हृदादिदक्षपादांतम् ॥ ॐ ऐंह्रींश्रीं २४
हंप्राणात्मनेनमः हृदादिवामपदांतम् ॥ ॐ ऐंह्रीं
श्रींलंजीवात्मनेनमः पादादिहृदंतम् ॥ ॐ ऐंह्रींश्रीं
क्षंपरमात्मनेनमः हृदादिमूर्धांतम् ॥ इतिविन्यस्य
पंचाशद्वर्ण रूपांचकपर्दशशिभूषणाम् ॥ शुद्धस्फटि
कसंकाशांशुद्धक्षौमविराजितां॥ मुक्तारत्नस्फुरद्भूषां
जपमालांकमंडलुं ॥ पुस्तकंवरदानंचबिभ्रतींपरमे
श्वरीम् ॥ एवंध्यात्वामातृकान्यस्यविद्या न्यासंकु
र्यात्तथाऐंनमःमणिबंधेह्रींनमःतले श्रींनमःअग्रेइ
तिदक्षकरे ॥ ऐंनमःमणिबंधेह्रीं नमः तलेश्रींनमः
अग्रेइतिवामकरे ॥ ऐंनमः दक्षकक्ष्ये ॥ ह्रींनमः दक्ष
कूर्परे ॥ श्रींनमः दक्षपाणौ ऐंनमःवामकक्ष्ये ॥ ह्रीं

shrinath.udupa@gmail.com

प० नमः वामकूर्परे श्रींनमः वामपाणौ ॥ ऐंनमः दक्ष स्तो०
२४ पादकक्ष्ये ह्रींनमः जानुनि ॥ श्रींनमः पादाग्रे ॥
ऐंनमः वामपादकक्ष्ये ॥ ह्रींनमःजानुनि॥ श्रींनमः
पादाग्रे ऐंनमः लिंगे ह्रींनमः हृदि श्रींनमः नादांते
॥ इतिविद्यान्यासः ॥ अथनवयोनिन्यासः ऐंनमः
दक्षकर्णे ॥ ह्रींनमः वामकर्णे ॥ श्रींनमः चिबुके ॥
ऐंनमः दक्षशंखे ॥ ह्रींनमः वामशंखे ॥ श्रींनमः
मुखे ऐंनमः दक्षनेत्रे ॥ ह्रींनमः वामनेत्रे ॥ श्रींनमः २४
कुक्षौ ॥ ऐंनमः दक्षजानुनि ॥ ह्रींनमः वामजानुनि
॥श्रींनमः नाभौ ॥ ऐंनमः दक्षपादे॥ह्रींनमः वामपादे

श्रींनमः हृदि ॥ ऐंनमःदक्षजानुनि ॥ ह्रींनमः वाम
जानुनि ॥ श्रींनमःकंठे ॥ इतिनवयोनिन्यासः ॥
ततःपुनरपि षडंगन्यासःसान्वयेन ॥ ऐंहृदयायनमः
ह्रींशिरसेस्वाहा श्रींशिखायैवषट् ॥ प्रत्यंगिरेकवचा
यहुं ॥ मेमरक्षरक्षनेत्रत्रया यवौषट् ॥ ममशत्रूणांभक्ष
भक्ष ॐस्वाहा अस्त्रायफट् इतिन्यासैर्देहंसंनह्य॥मूला
धारेमूलविद्यांविद्युत्कोटिसमप्रभाम्॥ सूर्यकोटिप्रती
काशांचंद्रकोटिप्रभांप्रिये ॥ बिसतंतुस्वरूपांतांबिंदु
त्रिवलयांप्रिये ॥ ऊर्द्ध्वशक्तिनिपातेनसहजेनवरानने॥
मूलशक्तिदृढत्वेन मध्यशक्तिप्रबोधतः ॥ परमानंद

shrinath.udupa@gmail.com

प्र० संदोहमानंदंचिंतयेत्परम् ॥ इत्यंतर्यजनंकृत्वापीठ स्तो०
२५ पूजांन्यासेनस्वदेहेकुर्यात ॥ मूलाधारे आधारशक्त्ये
नमः ॥ प्रकृत्यैनमः ॥ कमठायनमः ॥ शेषायनमः॥
पृथिव्यैनमः ॥ सुधांबुधयेनम ॥ मणिद्वीपायनमः ॥
चिंतामणिगृहायनमः रत्नवेदिकायैनमः ॥ मणिपी
ठायनमः ॥ दिक्षु नानामुनिगणेभ्योनमः ॥ नानादेवे
भ्योनमः ॥ धर्मायनमः दक्षांसे ॥ ज्ञानायनमः वा
मांसे ॥ वैराग्यायनमः वामोरौ ॥ ऐश्वर्यायनमःद २५
क्षोरौ ॥ अधर्मायनमः दक्षकुक्षौ ॥ अज्ञानायनमः
[illegible]
नमः वामकुक्षौ ॥ शेषायनमः ॥ विकृतिमयकेस
रेभ्योनमः ॥ पंचाशद्बीजभूषितकर्णिकायैनमः ॥
सूर्यमंडलायनमः ॥ सोममंडलायनमः ॥ वैश्वानर
मंडलायनमः ॥ संसत्त्वायनमः॥रंरजसेनमः ॥ तंत
मसेनमः ॥ आंआत्मनेनमः ॥ पंपरमात्मनेनमः ॥
ह्रींज्ञानात्मनेनमः ॥ पत्रेषु वामायैनमः ॥ ज्येष्ठायै
नमः ॥ रौद्र्यैनमः ॥ अंबिकायैनमः ॥ इच्छायै
नमः ॥ ज्ञानायैनमः ॥ क्रियायैनमः ॥ कुब्जिकायै
नमः ॥ चित्रायैनमः ॥ विषघ्निकायैनमः ॥ दूतायै
नमः ॥ आनंदायैनमः ॥ मध्ये ॥ मनोन्मन्यैनम॥

M. V. Shankaran, M.Sc., B.Ed.

shrinath.udupa@gmail.com

ऐंपरायैनमः ॥ अपरायैनमः ॥ विरूपायैनमः ॥ प
रापरायैनमः ॥ ह्सौंसदाशिवमहाप्रेतासनायैनमः ॥
ब्रह्मविष्णुरुद्रेश्वरसदाशिवमहाप्रेतमहापद्मासनाय न
मः ॥ परमशिवपर्यंकायनमः ॥ इति पीठंन्यस्य ॥
तत्रैवहृपर्येस्वाभेदेन श्रीप्रत्यंगिरां ध्यायेत् ॥
ॐ ऊर्ध्वंकपालंडमरुंत्रिशूलंसंबिभ्रती बद्धकला
वतंसम् ॥ पिंगोर्ध्वकेशी सितभीमदंष्ट्राभूया
द्विभूत्यैममभद्रकाली ॥ इति श्रीप्रत्यंगिरां ध्यात्वा
मानसोपचारैराराध्य ॥ मनसा यथाशक्तिजपहोमा
दिकं च कृत्वा कामकलां विचिंत्य तदुपरि श्रीप्र
त्यंगिरां यथोक्तां ध्यायन् स्ववामभागेषट्कोणां
तर्गतत्रिकोणद्वयबिंदुं वा स्ववृत्तचतुरस्रं कृत्वा ॥
स्वदक्षेत्रिकोणंवृत्तंबिबमंडलं भूमौविरच्य ॥ तत्रा
धारशक्तिं प्रपूज्य तत्राधारंनिक्षिप्य तदुपरि अमं
त्रेणशोधितं हृन्मंत्रेणपूरितपात्रे शंखादिकंवासंस्था
प्य तत्रगंगेत्यादितीर्थमावाह्य ॥ गंधादीन्प्रणवेन
निक्षिप्य वह्निसूर्यसोमकलाभिः संपूज्य धेनुमुद्रां
प्रदर्श्य स्वमंत्रेणसंपूजयेदिति विधिविहितसामान्या
र्घोदकेनस्ववामे कृतमभ्युक्ष्य ॥ तत्राधारशक्तिभ्यो
नम इत्यादिपीठपूजाक्रमेणसंपूज्य नमः इत्याधारं

shrinath.udupa@gmail.com

१० प्रक्षाल्य मंडलोपरिसंस्थाप्य ॥ रंवह्निमंडलाय स्तो०
२७ दशकलात्मनेनमः इतिप्रपूज्य ॥ फडितकलशं
प्रक्षाल्य ॥ वारिणाऽऽपूर्य ॥ रक्तवस्त्रमाल्यादि
नासंभूष्य ॥ देवंमध्येसंस्थाप्य ॥ अंअर्कमं
डालायद्वादशाकलात्मनेनमः इति कलशं
सम्पूज्य ॥ ॐ चंद्रमडलायषोडशकलात्मनेनमः
इति द्रव्येण संपूज्य ॥ फडितिसंरक्ष्य हुमित्यव
गुंठ्य मूलेनसंवीक्ष्य ॥ नमः इत्यभ्युक्ष्य मूलेन
गंधमाघ्राय ॥ कुंभेपुष्पंदत्त्वा ॥ शापमोचनं २७
कुर्यात ॥ एवमेवपरब्रह्मस्थलसूक्ष्ममयंध्रवम ॥ क
चोद्भवांब्रह्महत्यांतेनतेनाशयाम्यहम् ॥ १ ॥ सूर्य
मंडलसंभूतेवरुणानयसंभवे ॥ अमाबीजमयेदेविशु
क्रशापाद्विमुच्यताम् ॥ २ ॥ वेदानांप्रणवो बीजं
ब्रह्मानंदमयंयदि ॥ तेनसत्येनहेदेविब्रह्महत्यांव्य
पोहतु ॥ ३ ॥ इति त्रिः ॥ ततःॐवांवींवूंवैं व्रौंवः ॥
ब्रह्मशापमोचितासुरादेव्यैनमः ॥ इत्यपि त्रिः ॥ ह्रीं
श्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः सुराकृष्णशापं मोचयमोचय
अमृतं स्त्रावयस्त्रावयस्वास्वा इति॥त्रिः॥हंसःशुचिषद्व
सुरंतरिक्षस०न्नृष० द्वयोमसदब्जा ऋतजा अद्रिजा
ऋतम् ॥ इत्यपि त्रिःपठित्वा ॥ आनंदभैरवींचत

shrinath.udupa@gmail.com

न्ध्यात्वा ॥ हसरक्षमलवय ॥ ॐ आनंदभैरवायवौ
२८ षट् ॥ ससहक्षमलवयहुंसुरादेव्यै वोषट् ॥ इतिदे
वदेव्यौ त्रिःसंपूज्य ॥ द्रव्यमध्ये दक्षिणावर्तेनत्रि
पंक्त्या अंमनः आंनमः इंनमः ईंनम उंनमः ऊंनमः
ऋंनम ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः ओं
नमः औंनमः अंनमः अःनमः कंनमः खंनमः गं
नमः घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः
ञंनमः टंनमः ठंनमः डंनमः ढंनमः णंनमः तंनमः
थंनमः दंनमः धंनमः नंनमः पंनमः फंनमः बंनमः २८
भंनमः मंनमः यंनमः रंनमः लंनमः वंनमः शंन
मः षंनमः संनमः क्षंनमः इतिशक्तिचक्रंविलिख्य ॥
तन्मध्येहंनमः क्षंनमः तत्समावेशाद्द्रव्यमध्येऽमृतं
विचिंत्य धेनुमुद्रयाऽमृतीकृत्य वमितिसुधाबीजंमूलं
पठन् घटं धृत्वात्मश्रीचक्रयोर्मध्येत्रिकोणषट्कोण
वृत्तचतुरस्रे विलिख्य चतुरस्रेपूर्णगिरिपीठायनमः
उड्डीयानपीठायनमः कामरूपपीठाय नमः जालंध
रपीठाय नमःइतिसंपूज्य षट्कोणेषडंगंसंपूज्य त्रि
खंडेनकोणाग्रदक्षोत्तरंसंपूज्य मध्येआधारशक्तिं सं
पूज्य त्रिकोणगर्भेयंत्रिकांसंस्थाप्य नम इतिसामा
न्यजलेनाभ्युक्ष्य पंधूम्रार्चिषेनमः रंऊष्मायैनमः लं

ज्वालिन्यैनमः पंज्वालिन्यैनमः शंविस्फुलिंगिन्यै स्वा०
२९ नमः षंसु[illegible]यैनमः [illegible] हंक[illegible]यै
shrinath.udupa@gmail.com
नमः ळंहव्यवाहायैनमः शंकव्यवाहायैनमः इतिसं
पूज्यमध्येरंवह्निमंडलायदशकालात्मनेनमः इतिसं
पूज्य षट्कोणेषडंगंचसंपूज्यमध्येमूलेन देवींसंपूज्य
पात्रंफडिति प्रक्षाल्य यंत्रिकोपरिस्थाप्य तत्रकंभंत
पिन्यैनमः खंबंतापिन्यैनमः गंफंधूम्रायैनमःघंपंमरी
च्यैनमः ङंनंज्वलिन्यैनमः चंधंरुच्यैनमः छंदंसुषु
म्नायैनमःजंथंभोगदायैनमःझंतंविश्वायैनमःञंबोधि २९
ध्यैनमःटंठंधारिण्यैनमःठंडंक्षमायैनमःइतिअंअर्कमं

डालायद्वादशकलात्मनेनमःइतिसंपूज्यत्रिकोणप्रत्तष
ट्कोणपात्रंविलिख्यसमस्तव्यस्तमंत्रेणसंपूज्यवरुण
वीजंविलोममातृकांचपठन्भूतेनत्रिकोणआंमानदा
जलेनापूर्य ॥ तत्रसुगंधादिनिक्षिप्य॥अंअमृतायैनमः
यैनमःइंउषायैनमःईंतुष्टैयैनमः उंपुष्टैयैनमःऊंरत्यैन
मः ऋंधृत्यैनमः ॠंशशिन्यैनमः ऌंचंद्रिकायैनमः
ॡंकांत्यैनमः एंज्योत्स्यनायैनमः ऐंश्रियैनमः ओं
प्रीत्यै नमः औं अंगदायै नमः अंपूर्णायैनमः अ
पूर्णामृतायैनमः इति षोडशकलात्मनेसोममंडलाय
नमः इति संपूज्य पूर्ववन्मंत्रद्रव्येविलिख्य त्रिकोण

shrinath.udupa@gmail.com

५० त्रिरेखायां अंआं इंईउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः
३० कंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरं लंवंशंषंसं इति त्रिस्त्रिर्विलिख्य मूलखंडत्रयेण त्रिकोणंसंपूज्य षट्कोणे षडंगंच संपूज्य गंगेत्यादितीर्थमावाह्य आनंदभैरवभैरव्यौ स्वमंत्रेणसंपूज्य पूर्वादितः ॥ ग्लूंगगनरत्नेभ्योनमः पूर्वे ॥ श्लूंस्वर्गरत्नेभ्योनमःदक्षिणे ॥ प्लूंपातालरत्नेभ्योनमःपश्चिमे ॥ म्लूंमर्त्यरत्नेभ्योनमः उत्तरे ॥ न्लूंनागरत्नेभ्यो ३० नमः मध्ये॥इतिसंपूज्य ॥ मांसादिसंशोध्यहुमित्यवगुंठ्य अमृतीकृत्य तालत्रयेणदिशः संबध्य तदुपरि

सप्तधामूलंसंपूज्य तत्र देवीमावाह्य तालत्रयेण दिग्बंधंविधायावगुंठ्यामृतीकृत्ययोनिं प्रदर्श्य ह्सौं नमः संपूज्य शंखमुद्रांप्रदर्श्य षडंगेनसंकलीकृत्य मत्स्यमुद्रया आच्छाद्य मूलंसुधाबीजंजप्त्वा पात्रं देवीरूपं विभावयेदिति । ततोदेव्याज्ञामादाय घटसमीपे चरुपात्रं ततः शक्तिपात्रं भोगपात्रस्वपात्रं योगिनीपात्रं वीरपात्रं बलिपाद्यार्घ्याचमनीयपाणिसंस्थाप्य चर्वणकारणेन तत्तन्मुद्रया श्रीपात्रात्समुद्धृत्य आनंदभैरवं तर्प्पयामि नमः इति मंत्रेणत्रिः संतर्प्य ततः गुरुंश्रीमच्छ्रीअमुकानंदनाथ श्रीपादुकां

shrinathudupa@gmail.com

३० तर्प्पयामि नमः इति त्रिः संतर्प्य परमगुरुश्रीअमु स्तो.
३१ कानंदनाथश्रीपादुकां तर्प्पयामि नमः इतित्रिःसंत
र्प्यपरमाचार्यगुरुं श्रीमच्छ्रीअमुकानंदनाथश्रीपादुकां
तर्प्पयामि नमः इति त्रिःसंतर्प्य॥ श्रीपात्रामृतेनमूल
देवींसायुधांसवाहनांसपरिवारां तर्प्पयामिनमःइति
संतर्प्पयेदिति कलशपूजाविधिः ॥ चक्रोपरिपीठो
परिपीठपूजांपूर्ववद्विधाय ॥ अथ श्रीप्रत्यंगिरां
ध्यात्वावायुबीजेन वामनासापुटेन देवीस्वहृदया
त्कुसुमांजलिमानीयतत्रावाह्य ॥ ॐ देवेशिभक्तिसु ३१
लभेपरिवारसमन्विते॥ यावत्त्वांपूजयिष्यामितावद्दे

विइहावह इतिपठित्वामूलं श्रीभैरवसहिते श्रीप्रत्यां
गिरे इहागच्छगच्छ इहसन्निरुद्ध्यसन्निरुद्ध्यममस
र्वोपचारसहितां पूजांगृह्णगृह्णइत्यावाहनादिमुद्राःप्रद
र्श्य प्राणप्रतिष्ठांश्रीचक्रेलेलिहानमुद्रया विधाय
दशदिग्बंधनंकृत्वाऽवगुंठ्यसंकलीकृत्यपरमीकृत्य
धेनुयोनिप्रदर्श्य वराभयपुस्तकाक्षमालाज्ञानांकुशपा
शचापबाणकपालादिमुद्राः प्रदर्श्य श्रीपात्रामृतेनसा
युधां सवाहनां सपरिवारां सावरणां श्रीभैरवसहितां
श्रीप्रत्यंगिरांतर्पयामीति त्रिःसंतर्प्य पुनरपिमूलेनप्र
त्यंगिराश्रीपादुकांतर्प्पयामिनमः इतित्रिःसंतर्प्य मूल

shrinath.udupa@gmail.com

मुच्चार्य्य एतत्पाद्यंश्रीभैरवसहितप्रत्यंगिरायैनमःपाद्य
म् एवमर्घ्यंस्वाहाशिरशिआचमनीयं मधुपर्कंचसुधा
मुखेस्नानायनमःसर्वांगेइतिसुस्नाप्यशुद्धदुकूलेनांगप्रो
ञ्छ्य विचित्रपटवस्त्रकुंकुमकस्तुरीचंदनसिंदूरमुकुट
कुंडलहारनूपुरादिनानालंकारान्दत्त्वा पुनराचमनी
यंदद्यात् ॥ ततोमध्यनामांगुष्ठाग्रैर्गंधोनमः इति
गंधंअंगुष्ठतर्ज्जनीभ्यांपुष्पाणिवौषट् इतिपुष्पैः संपू
ज्य धूपपात्रंफडिति संपूज्य पुरतः स्थापयित्वा
वामतर्ज्जनींसंस्पृशन् श्रीपात्रा मृतेनधूपंनिवेदया ३२
मिनिवेद्य ॥ ॐ जगद्ध्वनियमंत्रमातःस्वाहेतिघंटां

संपूज्य वामेन पाणिनातांवादयन् मध्यमानामांगुष्ठै
र्धूपंनिधाय गायत्रींमूलमंत्रचपठन् वनस्पतिरसोत्प
न्नोगंधाढ्यो गंधसंयुतः ॥ आघ्रेयः सर्वदेवानां
धूपोयंप्रतिगृह्यतां इतित्रेधोत्तोल्यदेवींधूपयेत् ॥
ततोदीपंसंमुखेसंस्थाप्य पूर्ववत्प्रोक्षणंपूजनंकृत्वा
वाममध्यमयादीपपात्रंस्पृशन् दीपंन्निवेदयामितिनि
वेद्य पूर्ववद्घंटांवादयन्मध्यमानामामध्येदीपप. त्रमं
गुष्ठेनधृत्वादर्शयन् गायत्रींमूलंचपठन् सुप्रकाशो
महादीपः सर्वत्रतिमिरापहः ॥ सबाह्याभ्यंतरं
ज्योतिर्दीपोयंप्रतिगृह्यतामितिदीपयेत ॥ ततः
